पक्षबोधकस्तादृशबोधको वाक्यार्थावयवो निगमनम् इति” अनु०चिन्ता० तल्लक्षणं यथा
“उपनयानन्तरं निगमनं तच्चानुमितिहेतुलिङ्गपरामर्शप्रयोजकशब्दज्ञानकारणव्याप्तिपक्षताधीप्रयुक्तसाध्यधीजनकं वाक्यम्” ।
प्रतिकूलप्रमाणाभावसूचके २प्रतिज्ञोपसंहारवचने तस्मात् तथेति वचने यथा “असकृदनुचिन्तितानामव्याहततरनिजोपदेशानाम् । प्रामाण्यपरमसीम्नां निगमनमिदमेव निखिलनिगमानाम्” वेदान्तप० ।

**निगरण** न० नि+गॄ—ल्युट् । गरणस्य वमनस्य प्रतिरूपव्यापारे १भक्षणे मेदि० । निगीर्य्यतेऽनेन करणे ल्युट् । २गले पु० मेदि० । ३होमधूमे शब्दरत्ना० रस्य लः । निगलनमप्यत्र ।

**निगा(ग)ल** पु० नि+गॄ—घञ् अप् वा रस्य लः । १भक्षणे करणे घञ् । २अश्वगलदेशे अमरः “घण्टागलसमीपस्थो निगालः कीर्त्तितो बुधैः” अश्वशास्त्रम् । [शब्दार्थचि० ।

**निगालवत्** पु० निगाल+अस्त्यर्थे मतुप् मस्य वः । अश्वे

**निगीर्ण** त्रि० नि+गॄ—क्त । १भक्षिते २अन्तर्भाविते च “विषयिणारोप्यमाणेऽन्तःकृते—निगीर्णे अन्यस्मिन्नारोपविषये” काव्यप० ।

**निगु** पु० निगृह्यते ज्ञायते पदार्थोऽनेन नि+ग्रह बा० डु रलोपश्च । १मनसि त्रिका० । २मले ३मूले ४चित्रकर्मणि च संक्षिप्तसारोणादिवृत्तिः ।

**निगुत्** त्रि० नि+गु—शब्दे क्विप् तुक् । भयादिना अव्यक्तशब्दकारके “प्रत्यञ्चोयन्तु निगुतः” ऋ० १०।१२८।६

**निगूढ** त्रि० नि+गुह—क्त । १गुप्ते २वनमुद्गे पु० हेमच० “सुराजेव निगूढमन्त्रसाधनकथितविग्रहः” काद० ।

**निग्रन्थन** न० नि+ग्रन्थ—भावे ल्युट् । मारणे हेमच० ।

**निग्रह** पु० नि+ग्रह—अप् । १भर्त्सने २सीमायाम् ३बन्धने ४अनुग्रहाभावे ५चिकित्सायां निषिद्धे प्रवृत्तस्य ६तिरस्कारे ७मारणे प्रवृत्तिवारणाय ८रोधे च निरोधरूपयोगेन अभ्यासवैराग्यां ९मनसोनिरोधे “निग्रहानुग्रहे शक्तः प्रभुरित्यभिधीयते” । “तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्” गीता । १०परमेश्वरे पु० “प्रग्रहो निग्रहो व्यग्रः” विष्णुसं० । “सर्वं प्रलये निगृह्णातीति निग्रहः” भा० ।

**निग्रहस्थान** न० गौतमोक्ते वादिनोनिग्रहास्पदे वाक्यभेदे तल्लक्षणं यथा “विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्” गौ० सू० “क्रमप्राप्तं निग्रहस्थानम् लक्षयति । निग्रहस्य खलीकारस्य स्थानं तच्च विप्रतिपत्तिरप्रतिपत्तिश्च विप्रतिपत्तिर्विरुद्धा प्रतिपत्तिरप्रतिपत्तिः प्रकृताज्ञानं यद्यप्येतदन्यतरत् परनिष्ठं नोद्भावयितुमर्हं प्रतिज्ञाहान्यादेर्निग्रहस्थानत्वानुपपत्तिश्च तथापि विप्रतिपत्त्यप्रतिपत्त्यन्यतरोन्नायकधर्मवत्त्वं तदर्थः उद्देश्यानुगुणस्यगज्ञानाभावलिङ्गत्वं प्रतिज्ञाहान्याद्यन्यतमत्वं वा लक्षणमित्यपि वदन्ति” वृत्तिः । निग्रहस्थानानि द्वाविंशतिः यथा “प्रतिज्ञाहानिः१ प्रतिज्ञान्तरम्२ प्रतिज्ञाविरोधः३ प्रतिज्ञासन्न्यासो४ हेत्वन्तर५मर्थान्तरं६ निरर्थक७मविज्ञातार्थ८मपार्थक९मप्राप्तकालं१० न्यून११मधिकं१२ पुनरुक्त१३मननुभाषण१४मज्ञानम१५प्रतिभा१६विक्षेपो१७ मतानुज्ञा१८पर्य्यनुयोज्योपेक्षणं१९ निरनुयोज्यानुयोगो२०ऽपसिद्धान्तो२१ हेत्वाभासाश्च२२ गौ०सू०उक्तानि । [शापे ।

**निग्राह** पु० नि+ग्रह—घञ् । अनिष्टं ते भूयादित्येवं रूपे

**निघ** पु० निर्विशेषेण हन्यते हन—क नि० । समविस्तारदैर्घ्ये तुल्यारोहपरिणाहे पदार्थे अमरः । निघा निघतरुच्छन्नैः” भट्टिः “निघो निमितम्” पा० “निमितमिह समारोहपरिणाहाभ्यां मितं निमितमित्युच्यते” जयम० ।

**निघण्टिका** स्त्री कन्दभेदे राजनि० ।

**निघण्टु** पु० नि+घटि—उ । पर्य्यायनाम्नामेकत्रार्थकथनाय संग्रहे कोषाभिधानादौ तच्च ऋग्वेदभाष्योपक्रमे उक्तं यथा “आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा” अस्यार्थः एकार्थवाचिनां पर्य्यायशब्दानां सङ्घो यत्र प्रायेणोपदिश्यते तत्र निघण्टुशब्दः प्रसिद्धः । तादृशेष्वमरसिंहवैजयन्तीहलायुधादिषु दश निघण्टव इति व्यवहारात् । एवमत्रापि पर्य्यायशब्दसङ्घोपदेशादाद्यकाण्डस्य नैघण्टुकत्वम् । तस्मिन् काण्डे त्रयोऽध्यायाः । तेषु प्रथमे पृथिव्यादिलोकदिक्कालादिद्रव्यविषयाणि नामानि, द्वितीये मनुष्यतदवयवादिद्रव्यविषयाणि, तृतीये तदुभयद्रव्यगततनुबहुत्वह्रस्वत्वादिधर्मविषयाणि” ।

**निघर्ष** पु० नि+घृष—भावे घञ् । घर्षणे (घसा) “तद्दशाखान्तनिघर्षजोऽनलः” किरा० । ल्युट् । निघर्षणमप्यत्र न० । यथा हि कनकं शुद्धं तापच्छेदनिघर्षणैः” भा० शा० १२३ ५७श्लो० ।

**निघस** पु० नि+अद+अप् घसादेशः । भोजने अमरः ।